Ṛgvedādi bhāṣya bhūmikā

Svāmī Dayānanda Sarasvatī

Traduction d'après l'édition Vaidika Pustakālaya

ओ३म्

अथ ऋग्वेदादिभाष्यभूमिका

Introduction au commentaire sur les Vedās[1]

ओ३म् स॒ह ना॑ववतु स॒ह नौ॑ भुनक्तु स॒ह वी॒र्यं॑ करवावहै।
ते॒ज॒स्वि ना॒वधी॑तमस्तु॒ मा वि॑द्विषा॒वहै॑॥
ओ३म् शान्ति॒ः शान्ति॒ः शान्ति॑ः॥

तैत्तिरीयारण्यके। नवमप्रपाठके। प्रथमानुवाके॥ [क]

Dieu ! Protège-nous [l'auteur] [et] [le lecteur] tous les deux [et] donne-nous des plaisirs. Acquérons ensemble de la vertu. Notre savoir [sur Dieu] [qui] [libère] sera lumineux. [Au cours] [de l'instruction,] n'ayons [pas] [entre nous] d'inimitié. *Óm !* La paix soit, la paix, paix.[2]

ब्रह्मानन्तमनादि विश्वकृदजं सत्यं परं शाश्वतं, विद्या यस्य सनातनी निगमभृद् वैधर्म्यविध्वंसिनी। वेदाख्या विमला हिता हि जगते नृभ्यः सुभाग्यप्रदा, तन्नत्वा निगमार्थभाष्यमतिना भाष्यं तु तन्तन्यते॥ १॥ [ख]

Étant incliné devant lui – [l'être] sans début (anādi) ni fin (anantam), le créateur de tous [les êtres] (viśvakṛt) [qui] jamais prit naissance (ajam), le véritable (satyam), le plus grand (param), l'éternel (śāśvatam) Brahmā, [et] désirant [expliquer] le sens de son éternelle sapience, nommée Veda, [qui] soutient la justice, fait tomber l'injustice, [qui] [est] pure, bénéfique au monde [et] donne à l'humanité le bonheur – j'étends [sur papier] [ce] commentaire.

कालरामाङ्कचन्द्रेऽब्दे भाद्रमासे सिते दले। प्रतिपद्यादित्यवारे भाष्यारम्भः कृतो मया॥ २॥ [ग]

---

[1] PĀṆINI, *Aṣṭādhyāyī*, adh. I, 1, 1.

Le mot *atha* avant le titre signifie que l'introduction « commence », *prārabhyate*. Le mot bhāṣya est lui composé de la racine √bhāṣ, sur « l'action de parler », *vāci*, et du suffixe ṇyat, selon Paramānanda. Le nom « phrase » (grec *phrásis*) le traduit, comme ici « commentaire » sur les *Vedās*.

[2] ŚAṄKARĀCĀRYA, *Taittirīyopaniṣad bhāṣya*, val. I, 1.

Śaṅkara écrivit que « śāntiḥ est prononcé trois fois afin que ne surgissent de notre corps, des autres êtres et de Dieu des obstacles dans l'acquisition du savoir », *śāntiḥ śāntiḥ śānti[r] iti trirvacanamādhyātmikādhibhautikādhidaivikānāṃ vidyāprāptyupasargāṇāṃ praśamanārtham*. Au début de cette prière se trouve *óm*, le nom de Dieu.

J'ai débuté [ce] commentaire [à Ayodhyā] le dimanche, premier jour de la moitié claire du mois [lunaire] de bhādra en l'an 1933 [de l'ère Vikrama].[3]

दयाया आनन्दो विलसति परः स्वात्मविदितः, सरस्वत्यस्याग्रे निवसति हिता हीशशरणा। इयं ख्यातिर्यस्य प्रततसुगुणा वेदमननाऽस्त्यनेनेदं भाष्यं रचितमिति बोद्धव्यमनघाः॥ ३॥ [घ]

[Les personnes] sans fautes (anaghāḥ) doivent savoir [que] ce commentaire [est] préparé par celui [qui] [a] [mémorisé] [les *Vedās*]. Le bonheur (ānanda) absolu, [qui] dans le Soi se connaît, luit après la compassion (dayā) [dans son nom]. Sarasvatī, refuge divin [qu'][est] [la sapience], pour le bien [de l'humanité] reste à la fin de son [nom]. Plein de bonnes qualités [et] pensant à Dieu, il est célébré.

मनुष्येभ्यो हितायैव सत्यार्थं सत्यमानतः। ईश्वरानुग्रहेणेदं वेदभाष्यं विधीयते॥ ४॥ [ङ]

Ce commentaire sur les *Vedās*, fait avec le soutien de Dieu (īśvara), pour le bien de l'humanité (manuṣyebhyo hitāya), [en] [offre] d'autorités le sens véritable.

संस्कृतप्राकृताभ्यां यद् भाषाभ्यामन्वितं शुभम्। मन्त्रार्थवर्णनं चात्र क्रियते कामधुङ्मया॥ ५॥ [च]

Sanskrit [et] prakrit, deux langues iront ici clairement [expliquer] le sens des mots des *Vedās*, [ce] [qui] [comme] [du lait] satisfera [nos] désirs.[4]

आर्य्याणां मुन्यृषीणां या व्याख्यारीतिः सनातनी। तां समाश्रित्य मन्त्रार्था विधास्यन्ते तु नान्यथा॥ ६॥ [छ]

Ayant recours à la méthode éternelle d'explication [qui] [fut] [celle] des penseurs (muni) et sages (ṛṣīṇām) *Āryās*, mais pas par une autre, sera des vers le sens préservé.[5]

येनाधुनिकभाष्यैर्ये टीकाभिर्वेददूषकाः। दोषाः सर्वे विनश्येयुरन्यथार्थविवर्णनाः॥ ७॥ [ज]

Les fautes (doṣāḥ), celles [faites] par les commentaires (bhāṣyaiḥ) et les annotations (ṭīkābhiḥ) modernes (ādhunika) qui corrompent les *Vedās* de sens autres et obscurs (vivarṇanāḥ), doivent toutes être éloignées.

सत्यार्थश्च प्रकाश्येत वेदानां यः सनातनः। ईश्वरस्य सहायेन प्रयत्नोऽयं सुसिध्यताम्॥ ८॥ [झ]

---

[3] Ce fut le 20 août 1876 après Jésus-Christ sur le calendrier du pape Grégoire XIII.

[4] La deuxième langue, celle de la traduction, est ici moins satisfaisante.

[5] SVĀMĪ DAYĀNANDA SARASVATĪ, *Ṛgvedādi bhāṣya bhūmikā*, viṣ. XXX.

Afin d'avoir la mémoire du sage qui en vu le sens, son nom est écrit au-dessus du mantra.

Le véritable sens des *Vedās*, qui [est] éternel (sanātanaḥ), doit briller. [Je] [prie] que cette activité réussisse avec le soutien du [tout] puissant (īśvarasya) !

ऋषिः - नारायणः। देवता - सविता। छन्दः - गायत्री। स्वरः - षड्जः॥

ओ३म् विश्वा॑नि देव सवितर्दुरिता॒नि॒ परा॑ सुव। यद्भ॒द्रं तन्न॒ऽ आ सु॑व॥

यजुर्वेदे। अध्याये ३०। मन्त्रः ३॥ [ञ]

(Le roi) [élu] (comme toi) divin Savitā́ ! Éloigne (de nous) toutes [ces] duretés [telles que] (la mauvaise conduite ou les peines). Assouvis nos [désirs] pour ce qui [est] bon [tel que] (la bonne conduite ou les plaisirs).

भाष्यम् — हे सच्चिदानन्दानन्तस्वरूप ! हे परमकारुणिक ! हे अनन्तविद्य ! हे विद्याविज्ञानप्रद ! (देव) हे सूर्यादिसर्वजगद्विद्याप्रकाशक ! हे सर्वानन्दप्रद ! (सवितः) हे सकलजगदुत्पादक ! (नः) अस्माकं (विश्वानि) सर्वाणि (दुरितानि) दुःखानि सर्वान्दुष्टगुणांश्च (परा सुव) दूरे गमय। (यद्भद्रं) यत्कल्याणं सर्वदुःखरहितं सत्यविद्याप्राप्त्याऽभ्युदयनिःश्रेयस्सुखकरं भद्रमस्ति (तन्नः) अस्मभ्यं (आ सुव) आ समन्तादुत्पादय कृपया प्रापय। [ट]

Commentaire – Être, intelligence, bonheur (saccidānanda) infini (anantasvarūpa) [es-][tu] ! Ô [Dieu] de compassion parfaite (paramakāruṇika) ! [6] Savoir infini (anantavidya) ! Tu donnes de [ce] savoir et [sa] réalisation (vidyāvijñānaprada). Savitā ! Tu produis en entier (sakalajagadutpādaka) [et] tu illumines le monde du devenir [qui] [comprend] le soleil et ainsi de suite (sūryādisarvajagadvidyāprakāśaka). Toi [qui] donnes le bonheur (sarvānandaprada) ! Éloigne toutes nos peines et toutes [nos] mauvaises qualités. Par pitié, donne-nous [ce] qui [est] bon, [soit] le bonheur (sukha), à la déréliction de toutes [nos] peines (duḥkhāni). L'obtention du véritable savoir cause le bonheur [et] la délivrance finale.

अस्मिन् वेदभाष्यकरणानुष्ठाने ये दुष्टा विघ्नास्तान् प्राप्तेः पूर्वमेव परासुव दूरं गमय, यच्च शरीरबुद्धिसहायकौशलसत्यविद्याप्रकाशादि भद्रमस्ति तत्स्वकृपाकटाक्षेण हे परब्रह्मन् ! नोऽस्मभ्यं प्रापय, भवत्कृपाकटाक्षसुसहायप्राप्त्या सत्यविद्योज्ज्वलं प्रत्यक्षादिप्रमाणसिद्धं भवद्रचितानां वेदानां यथार्थं भाष्यं वयं विदधीमहि। तदिदं सर्वमनुष्योपकाराय भवत्कृपया भवेत्। अस्मिन् वेदभाष्ये सर्वेषां मनुष्याणां परमश्रद्धयाऽत्यन्ता प्रीतिर्यथा स्यात् तथैव भवता कार्यमित्यो३म्॥ १॥ [ठ]

Brahmā ! Porte au loin, immédiatement, les obstacles à la composition de cette [introduction] au commentaire sur les *Vedās* avant qu'ils n'arrivent. Par pitié, fais que nous obtenions ce [qui] est bon, [comme] la santé dans le corps (śarīra), l'intelligence (buddhi), le soutien d'autrui

---

[6] PĀṆINI, *Uṇādikoṣa*, pād. III, 53.

Ce nom divin est synonyme de dayā et de karuṇā. L'adjectif féminin karuṇā est composé de la racine √kṝ, sur « l'action de rejeter » une mauvaise qualité, *vikṣepe*, et du suffixe unan.

(sahāya), la prospérité (kauśala), la lumière du véritable savoir (satyavidyāprakāśa) etc. Ta pitié [est] un soutien qui permet d'obtenir le véritable savoir illuminant (ujjvalam). Je vais composer [cette] [introduction] au commentaire sur les *Vedās* avec des preuves d'instruments de connaissance (pramāṇa) [qui] commencent avec la perception. Par pitié, tu dois faire [en sorte que] cela soit pour le bienfait de l'humanité. Enjoins à tous les hommes d'avoir la plus grande foi (śraddhayā) en cette [introduction] [et] de dépasser [envers] [elle] [la limite] de l'amour (prītiḥ). Ōm !

ऋषिः - कुत्सः। देवता - अध्यात्मम्। छन्दः - उपरिष्टाद्विराड्बृहती॥

यो भू॒तं च॒ भव्यं॑ च॒ सर्वं॒ यश्चा॑धि॒तिष्ठ॑ति।

स्व१॒॑र्यस्य॑ च॒ केव॑लं॒ तस्मै॑ ज्ये॒ष्ठाय॒ ब्रह्म॑णे॒ नमः॑॥

अथर्ववेदे। काण्डे १०। सूक्ते ८। मन्त्रः १॥ [ड]

Obéissance à Brahmá́, à lui le meilleur, qui gouverne tout, le passé,
[le présent] et l'avenir. [Il] [est] de bonheur absolu.

भाष्यम् — (यो भूतं च०) यो भूतभविष्यद्वर्तमानान् कालान् (सर्वं यश्चाधि०) सर्वं जगच्चाधितिष्ठति, सर्वाधिष्ठाता सन् कालादूर्ध्वं विराजमानोऽस्ति। (स्वर्य०) यस्य च केवलं निर्विकारं स्वः सुखस्वरूपमस्ति, यस्मिन् दुःखं लेशमात्रमपि नास्ति, यदानन्दघनं ब्रह्मास्ति, (तस्मै ज्ये०) तस्मै ज्येष्ठाय सर्वोत्कृष्टाय ब्रह्मणे महतेऽत्यन्तं नमोऽस्तु नः॥ १॥ [ढ]

Commentaire – Existant hors du temps (kālād ūrdhvam), [Dieu] gouverne les temps du passé, du présent et de l'avenir. Il gouverne le monde du devenir [et] [le Soi] [des êtres vivants], étant le gouvernant. De nature de bonheur (sukhasvarūpam) absolu (kevalam) et immuable (nirvikāram), il est sans peine. Au meilleur, au plus élevé de tous, au puissant, à Dieu [nommé] Brahman nous obéissons (brahmaṇe namaḥ).

ऋषिः - अथर्वा। देवता - स्कम्भः, अध्यात्मम्। छन्दः - उपरिष्टाद्विराड्बृहती॥

यस्य॒ भूमिः॑ प्र॒मान्तरि॑क्षमु॒तोदर॑म्।

दिवं॒ यश्च॒क्रे मू॒र्धानं॒ तस्मै॑ ज्ये॒ष्ठाय॒ ब्रह्म॑णे॒ नमः॑॥

अथर्व० कां० १०। सू० ७। मं० ३२॥ [ण]

Obéissance à Brahmá́, à lui le meilleur, [le créateur]. La terre [est]
[comme] [ses] pieds, l'atmosphère [comme] [son] tronc et l'espace
diurne est fait [comme] [sa] tête.

(यस्य भू०) यस्य भूमिः प्रमा यथार्थज्ञानसाधनं पादाविवास्ति, (अन्तरिक्षमु०) अन्तरिक्षं यस्योदरतुल्यमस्ति, यश्च सर्वस्मादूर्ध्वं सूर्यरश्मिप्रकाशमयमाकाशं दिवं मूर्धानं शिरोवच्चक्रे कृतवानस्ति, तस्मै० ॥ २ ॥ त

Existant hors de sa création matérielle (sarvasmād ūrdhvam) [et] [dans elle], [Dieu] [nous] éclaire avec la lumière du soleil. La terre est comme [ses] deux pieds, [car] le savoir [y] [est] acquis. L'atmosphère est comme [son] tronc et l'espace diurne (divam) du soleil [et] [des planètes] est fait comme sa tête.

ऋषिः - अथर्वा। देवता - स्कम्भः, अध्यात्मम्। छन्दः - पराविराडनुष्टुप्॥

यस्य सूर्यश्चक्षुश्चन्द्रमांश्च पुनर्णवः।

अग्निं यश्चक्र आस्यं१ तस्मै ज्येष्ठाय ब्रह्मणे नमः॥

अथर्व० कां० १०। सू० ७। मं० ३३॥ थ

Obéissance à Brahmá, à lui le meilleur, [le créateur]. Le soleil et la lune [sont] [comme] [ses] yeux renouvelés. Le feu est fait [comme] [sa] bouche.

(यस्य सू०) यस्य सूर्यश्चन्द्रमाश्च पुनः पुनः सर्गादौ नवीने चक्षुषी इव भवतः, योऽग्निमास्यं मुखवच्चक्रे कृतवानस्ति, तस्मै० ॥ ३ ॥ द

[Dieu] renouvelle le soleil et la lune au début des [innombrables] périodes de création (sarga). [Ces] deux sont comme [ses] yeux. Le feu est fait [comme] [sa] bouche.

ऋषिः - अथर्वा। देवता - स्कम्भः, अध्यात्मम्। छन्दः - उपरिष्टाद्विराड्बृहती॥

यस्य वातः प्राणापानौ चक्षुरङ्गिरसोऽभवन्।

दिशो यश्चक्रे प्रज्ञानीस्तस्मै ज्येष्ठाय ब्रह्मणे नमः॥

अथर्व० कां० १०। सू० ७। मं० ३४॥ ध

Obéissance à Brahmá, à lui le meilleur, [le créateur]. Le vent [est] [comme] [ses] inspirations et [ses] expirations, [lui] dont les yeux étaient des objets lumineux. Il a créé les directions [qui] conduisent à la connaissance.[7]

[7] SVĀMĪ DAYĀNANDA SARASVATĪ, *Ṛgvedādi bhāṣya bhūmikā*, viṣ. XIV.

(यस्य वातः०) वातः समष्टिर्वायुर्यस्य प्राणापानाविवास्ति, (अङ्गिरसः) 'अङ्गिरा अङ्गारा अङ्कना अञ्चनाः' इति निरुक्ते। अ० ३। खं० १७॥ प्रकाशकाः किरणाश्चक्षुषी इव भवतः, यो दिशः प्रज्ञानीः प्रज्ञापिनीर्व्यवहारसाधिकाश्चक्रे, तस्मै ह्यनन्तविद्याय ब्रह्मणे महते सततं नमोऽस्तु॥ ४॥ [न]

Le vent est comme [ses] inspirations et [ses] expirations (prāṇāpānau), [lui] [dont] deux objets lumineux [qui] [se déplacent] [dans leurs] [trajectoires] sont comme les yeux, [la preuve] du *Nirukta* [à l'appui] *aṅgirasaḥ* [se dit] [d'objets] [qui] « vont », *añcanāḥ*. Il a créé les directions (diśaḥ) qui conduisent à la connaissance (prajñā) et [au moyen] [desquelles] s'accomplissent les actions (vyavahāra). À lui d'éternelle sapience, à Dieu [nommé] Brahman, [au meilleur] [et] au plus grand nous obéissons.

ऋषिः - प्रजापतिः। देवता - परमात्मा। छन्दः - निचृत्त्रिष्टुप्। स्वरः - धैवतः॥

यऽआ॑त्म॒दा ब॑ल॒दा यस्य॒ विश्व॑ऽउ॒पास॑ते प्र॒शिषं॒॑ यस्य॑ दे॒वाः।

यस्य॑ छा॒याऽमृतं॒॑ यस्य॑ मृ॒त्युः कस्मै॑ दे॒वाय॑ ह॒विषा॑ विधेम॥

य० अ० २५। मं० १३॥ [प]

Vouons [cette] offrande au divin protecteur des êtres, le Soi suprême, qui donne [le savoir] sur le Soi. Il donne [au corps] la vaillance. Tous les hommes divins sont assidus (au travail) qu'il enjoint. [Son] refuge [est] l'immortalité [et] le bris de son commandement [est] la mort.

भाष्यम् – (यऽआत्मदाः) यऽआत्मदा विद्याविज्ञानप्रदः, (बलदाः) यः शरीरेन्द्रियप्राणात्ममनसां पुष्ट्युत्साहपराक्रमदृढत्वप्रदः, (यस्य०) यं विश्वेदेवाः सर्वे विद्वांस उपासते यस्यानुशासनं च मन्यन्ते, (यस्य छाया०) यस्याश्रय एव मोक्षोऽस्ति, यस्याच्छायाऽकृपाऽनाश्रयो मृत्युर्जन्ममरणकारकोऽस्ति, (कस्मै०) तस्मै कस्मै प्रजापतये 'प्रजापतिर्वै कस्तस्मै हविषा विधेम' इति। शतपथब्राह्मणे। काण्डे ७। अध्याये ३। ब्राह्मणे १। कण्डिका २०॥ सुखस्वरूपाय ब्रह्मणे देवाय प्रेमभक्तिरूपेण हविषा वयं विधेम, सततं तस्यैवोपासनं कुर्वीमहि॥ ५॥ [फ]

Commentaire – Il donne la connaissance (vidyā) [et] sa réalisation (vijñāna). Il donne nourriture (puṣṭi), endurance (utsāha), puissance (parākrama) [et] croissance (dṛḍhatva) au corps (śarīra), aux sens (indriya), aux poumons (prāṇa), au cœur (ātma) [et] à l'instrument mental (manasām). Tous les hommes divins sont assidus [au travail] qu'il enjoint et [y] croient. [Son] refuge (chāyā) (āśrayaḥ) est la délivrance finale (mokṣaḥ) [et] l'absence cruelle de sa protection (anāśrayaḥ) [est] la mort, [c'est-à-dire] qu'il cause la vie et la mort. Nous devons adorer Dieu par [cette] offrande (devāya haviṣā vidhema), lui [nommé] Ka, Prajāpatiḥ. Ka

---

(1) Les restreintes, (2) les observances, (3) la posture, (4) le contrôle de la respiration, (5) l'abstraction, (6) la concentration, (7) la méditation, (8) l'absorption [dans l'essence de Dieu] [sont] les huit parties [du *Yoga*].

Le Yoga est défini comme l'absorption dans l'essence de Dieu et son bonheur – samādhi, à partir de la méditation sur lui.

[est] [le nom] de Dieu, [selon] [une assertion] du *Śatapatha brāhmaṇa*. Vouons [cette] offrande avec pieuse affection (premabhaktirūpeṇa) au divin Brahmā dont la nature [est] de bonheur [absolu] [et] [immuable]. Nous devons toujours l'adorer.

ऋषिः - दध्यङ्ङाथर्वणः। देवता - ईश्वरः। छन्दः - भुरिक्शक्करी। स्वरः - धैवतः॥

द्यौः शान्ति॑र॒न्तरि॑क्ष॒ꣳ शान्तिः॑ पृथि॒वी शान्ति॒रा॒पः शान्ति॒रोष॑धय॒ः शान्तिः॑।

व॒नस्पत॑य॒ः शान्ति॒र्विश्वे॑ दे॒वाः शान्ति॒र्ब्रह्म॒ शान्ति॒ः सर्व॒ꣳ शान्ति॒ः शान्ति॑रे॒व शान्ति॒ः

सा मा॒ शान्ति॑रेधि॥

य० अ० ३६। मं० १७॥ [ब]

La paix [soit] dans l'espace diurne, l'atmosphère en paix, la terre en paix, l'eau en paix, les plantes en paix, les arbres en paix, tous les hommes d'instruction divine en paix, les *Vedās* en paix. Que chacun [soit] en paix [et] (pacifie). Que la paix [soit] paisible [et] que la paix vienne à moi.

(द्यौः शान्तिः०) हे सर्वशक्तिमन् परमेश्वर ! त्वद्भक्त्या त्वत्कृपया च द्यौरन्तरिक्षं, पृथिवी जलमोषधयो वनस्पतयो विश्वे देवाः सर्वे विद्वांसो ब्रह्म वेदः, सर्वं जगच्चास्मदर्थं शान्तं निरुपद्रवं सुखकारकं सर्वदाऽस्तु। अनुकूलं भवतु नः। येन वयं वेदभाष्यं सुखेन विदधीमहि। हे भगवन् ! एतया सर्वशान्त्या विद्याबुद्धिविज्ञानारोग्यसर्वोत्तमसहायैर्भवान् मां सर्वथा वर्धयतु तथा सर्वं जगच्च॥ ६॥ [भ]

Dieu de pouvoir absolu (sarvaśaktiman) [nommé] Īśvara ! Par ta pitié (kṛpayā) et [notre] dévotion (bhaktyā) à toi, que l'espace diurne (dyauḥ) [du soleil] [et] [des étoiles], l'atmosphère (antarikṣam), la terre (pṛthivī), l'eau (āpaḥ) (jalam), les plantes (oṣadhayaḥ), les arbres (vanaspatayaḥ), tous les hommes d'instruction divine (devāḥ), les *Vedās* (brahma), [notre] propriété (artham) et le monde du devenir (jagat) en entier soient en paix [et] en sécurité (nirupadravam). Que [le monde] nous soit enclin (anukūlam), [afin] qu'avec plaisir (sukhena) je puisse écrire [ce] [commentaire]. Dieu (bhagavan) ! Avec cela, tous [sont] en paix. Fais fructifier complètement pour moi et aussi pour l'humanité [ces] meilleurs soutiens que sont le savoir (vidyā), l'intelligence (buddhi), la méditation (vijnāna) [et] la santé (ārogya).

ऋषिः - दध्यङ्ङाथर्वणः। देवता - ईश्वरः। छन्दः - भुरिगुष्णिक्। स्वरः - ऋषभः॥

यतो॑ यतः स॒मीह॑से॒ ततो॑ नो॒ऽअभ॑यं कुरु।

शं नः॑ कुरु प्र॒जाभ्यो॒ऽभ॑यं नः प॒शुभ्यः॑॥

य० अ० ३६। मं० २२॥ [म]

Quel que [soit] l'endroit (en toi) [sur lequel] tu agis, fais que nous [soyons] (en tout temps) impavides. Crée pour nous bonheur. Protège nos hommes (et) [nos] animaux.

(यतो य०) हे परमेश्वर ! यतो यतो देशात्त्वं समीहसे जगद्रचनपालनार्थां चेष्टां करोषि, ततस्ततो देशान्नोऽस्मानभयं कुरु, यतः सर्वथा सर्वेभ्यो देशेभ्यो भयरहिता भवत्कृपया वयं भवेम। (शं नः कु०) तथा तत्रस्थाभ्यः प्रजाभ्यः पशुभ्यश्च नोऽस्मानभयं कुरु, एवं सर्वेभ्यो देशेभ्यस्तत्रस्थाभ्यः प्रजाभ्यः पशुभ्यश्च नोऽस्मान् शंकुरु, धर्मार्थकाममोक्षादिसुखयुक्तान् स्वानुग्रहेण सद्यः सम्पादय॥ ७॥ [य]

Dieu [nommé] Īśvara ! Quel que [soit] l'endroit (deśāt) [sur lequel] tu agis, en le créant [et] en le maintenant, fais [que] nous y [soyons] sans peur (abhayam). Par pitié, nous devons être sans peur en tout lieu [et] en tout temps. Fais [que] nous [soyons] sans peur des hommes (prajābhyaḥ) et des animaux (paśubhyaḥ) [qui] y [sont] établis. [Sois] [notre] [protecteur] [et] fais notre bonheur (śam) dans tous les pays. [Nous] [prions] [que] par bienveillance (anugraheṇa) tu [nous] fasses échoir à la bonne conduite (dharma), à la poursuite des richesses (artha), à la poursuite des plaisirs (kāma) et à la délivrance finale (mokṣa) [dans lesquelles] [est] joint le bonheur (sukha).

ऋषिः - शिवसङ्कल्पः। देवता - मनः। छन्दः - त्रिष्टुप्। स्वरः - धैवतः॥

यस्मिन्नृचः साम यजूंꣳषि यस्मिन् प्रतिष्ठिता रथनाभाविवाराः।

यस्मिँश्चित्तꣳ सर्वमोतं प्रजानां तन्मे मनः शिवसङ्कल्पमस्तु॥

य० अ० ३४। मं० ५॥ [र]

[Que] mon instrument mental [soit] [celui] dans lequel les vers du *Ṛgveda*, du *Yajurveda*, du *Sāmaveda* [et] (de l'*Atharvaveda*) (sont) établis, comme les rayons des roues d'un véhicule (pour la conduite). De bons propos, qu'il soit [aussi] [celui] dans lequel le savoir des peuples est tissé [comme] (des perles sur le fil) [d'un] [collier].

(यस्मिन्नृ०) हे भगवन् कृपानिधे ! यस्मिन्मनसि ऋचः सामानि यजूंषि च प्रतिष्ठितानि भवन्ति, यस्मिन् यथार्थमोक्षविद्या च प्रतिष्ठिता भवति (यस्मिँश्चि०) यस्मिंश्च प्रजानां चित्तं स्मरणात्मकं सर्वमोतमस्ति सूत्रे मणिगणवत्प्रोतमस्ति। कस्यां क इव ? रथनाभौ अरा इव। तन्मे मम मनो भवत्कृपया शिवसङ्कल्पं कल्याणप्रियं सत्यार्थप्रकाशं चास्तु, येन वेदानां सत्यार्थः प्रकाश्येत। हे सर्वविद्यामय सर्वार्थविन् ! मदुपरि कृपां विधेहि, यया निर्विघ्नेन वेदार्थभाष्यं सत्यार्थं पूर्णं वयं कुर्वीमहि, भवद्यशो वेदानां सत्यार्थं विस्तारयेमहि। यं दृष्ट्वा वयं सर्वे सर्वोत्कृष्टगुणा भवेम। ईदृशीं करुणामस्माकमुपरि करोतु भवान्। एतदर्थं प्रार्थ्यते। अनया प्रार्थनयाऽस्मान् शीघ्रमेवानुगृह्णातु। यत इदं सर्वोपकारकं कृत्यं सिद्धं भवेत्॥ ८॥ [ल]

Dieu trésor de pitié (kṛpānidhe) ! [Que] [mon] instrument mental [soit] [celui] dans lequel les vers du *Ṛgveda*, du *Yajurveda*, du *Sāmaveda* et [de l'*Atharvaveda*] sont établis, dans lequel l'évidence (vidyā) sur la délivrance finale est établie et dans lequel le savoir (cittam) des peuples (prajānām) dans sa forme remémorée (smaraṇa) est tissé [comme] (des perles sur le fil) [d'un] [collier]. Avec ces bons propos (śivasaṅkalpam), le véritable sens des *Vedās* doit être éclairé. [Or] où [et] quelle [était] [ci-haut] l'analogie ? [La réponse] [est] [que :] « [ces] [livres] [sont] comme les rayons (arāḥ) des roues d'un véhicule (ratha). »

Dieu omniscient (sarvavidyāmaya) ! Par pitié, je dois faire, sans obstacles, un commentaire sur les *Vedās* [qui] [est] véritable [et] complet. Soutiens-moi vite [après] cette prière (prārthanayā), car ce [commentaire] bénéfique (upakārakam) pour tous doit être complété (siddham). Nous devons avoir toutes les meilleures qualités [afin] de répandre ta renommée (yaśaḥ) [et] le véritable sens des *Vedās*. Je te prie d'avoir pour nous une telle compassion (karuṇām). [Voilà] ce [qui] t'est demandé (prārthyate).

इतीश्वरप्रार्थनाविषयः॥ व

Ainsi [fut] la *Prière à Dieu*, le premier sujet.

अथ वैद्यकशास्त्रमूलोद्देशः संक्षेपतः [क]

Description de la racine, l’essentiel, de la science médicale

ऋषिः - दीर्घतमा। देवता - वरुणः। छन्दः - त्रिपाद्विराड्गायत्री। स्वरः - षड्जः॥

[मापो मौषंधीर्हिं᳖सीर्धाम्नोंधाम्नो राजँस्ततों वरुण नो मुञ्च।

यदाहुरघ्न्याऽइति वरुणेति शपांमहे ततों वरुण नो मुञ्च॥]

सुमित्रिया नऽआपऽओषंधयः सन्तु दुर्मित्रियास्तस्मैं सन्तु यो᳕ऽस्मान् द्वेष्टि यं चं वयं

द्विष्मः॥

य० अ० ६। मं० २२॥ [ख]

[(Ô) roi [élu], (président de l’Assemblée) ! Ne nuis [pas] à l’eau (et) aux plantes. Ensuite, ne (nous) abandonne [pas] dans [tel] [ou] [tel] lieu. (Ô) roi (honoré) ! [Protège-][nous.] Ne [nous] abandonne [pas]. Nous jurons de (ne) [pas] (abandonner) les vaches qu’ils disent (ne) [pas] (devoir tuer). (Ô) roi (justicier) ! [Toi] [et] [tes] (ministres doivent toujours punir les ennemis.)] Eau (et) plantes soyez amicales avec nous. Soyez inamicales avec (l’ennemi) qui nous (hait) et que nous haïssons.

भाष्यम् — अस्याभिप्रायार्थः — इदं वैद्यकशास्त्रस्यायुर्वेदस्य मूलमस्ति। हे परमवैद्येश्वर ! भवत्कृपया (नः) अस्मभ्यं (ओषधयः) सोमादयः, (सुमित्रिया) अत्र इयाडियाजीकाराणामुपसङ्ख्यानम् इति वार्त्तिकेन 'जसः' स्थाने 'डियाच्' इत्यादेशः। सुमित्राः सुखप्रदा रोगनाशकाः सन्तु, यथावद्विज्ञाताश्च। तथैव (आपः) प्राणाः सुमित्राः सन्तु। यथा (योऽस्मान् द्वेष्टि) योऽधर्मात्मा कामक्रोधादिर्वा रोगश्च विरोधी भवति, (यं च वयं द्विष्मः) यमधर्मात्मानं रोगं च वयं द्विष्मः, (तस्मै०) दुर्मित्रियाः दुःखप्रदा विरोधिन्यः सन्तु। अर्थात् ये सुपथ्यकारिणस्तेभ्य ओषधयो मित्रवद् दुःखनाशिका भवन्ति। तथैव कुपथ्यकारिभ्यो मनुष्येभ्यश्च शत्रुवद् दुःखाय भवन्तीति॥ [ग]

Commentaire – Le sens de ce [vers], ce [vers] est la racine de la science médicale, de l’*Āyurveda*.[8] Ô Dieu, [tu] [es] le médecin suprême (paramavaidyeśvara) ! Eau et plantes soyez amicales avec nous. Amicales (sumitriyāḥ), ici à la place de *jasaḥ* [se trouve] *ḍiyāc*, à cause de la règle supplémentaire (vārttikena) [selon] [laquelle] est ajouté *iyā*, *ḍiyāc* [ou] la lettre *ī*.[9] Ainsi [est] la règle. Amicales, [c’est-à-dire] donnez-[nous] du bonheur, enlevez [nos] maladies et [cela] [est] bien connu. Soyez inamicales (durmitriyāḥ), donnez de la peine, à celui qui nous hait et que nous haïssons. À celui [qui] est inamical (virodhī), injuste (adharmātmā), [attaché] aux

---

[8] SVĀMĪ DAYĀNANDA SARASVATĪ, *Ṛgvedādi bhāṣya bhūmikā*, viṣ. XXV.

Les livres d’*Āyurveda* autoritatifs sont de Caraka, Suśruta, le *Nighaṇṭu* [de Dhanvantari] et ainsi de suite.

[9] PĀṆINI, *Aṣṭādhyāyī*, adh. VII, 1, 39.

plaisirs (kāma), colérique (krodha) et ainsi de suite. En fait, les plantes [sont] comme l'ami de ceux qui suivent le bon chemin : elles enlèvent la peine. Elles sont comme l'ennemi, elles peinent les hommes [qui] suivent le mauvais chemin.

एवं वैद्यकशास्त्रस्य मूलार्थविधायका वेदेषु बहवो मन्त्राः सन्ति, प्रसङ्गाभावान्नात्र लिख्यन्ते। यत्र यत्र ते मन्त्राः सन्ति तत्र तत्रैव तेषामर्थान् यथावदुदाहरिष्यामः॥ घ

Il y a plusieurs vers dans les *Vedās* [qui] contiennent la racine de la science médicale. Il n'y a [pas] l'occasion de [les] écrire ici. Où se trouvent ces vers, là seulement nous en donnerons bien le sens.

इति वैद्यकविद्याविषयः संक्षेपतः॥ ङ

Ainsi [fut] la *Description de la racine, l'essentiel, de la science médicale*, le dix-huitième sujet.

अथ पञ्चमहायज्ञविषयः संक्षेपतः

L'essentiel des cinq grands sacrifices

ये पञ्चमहायज्ञा मनुष्यैर्नित्यं कर्त्तव्याः सन्ति, तेषां विधानं संक्षेपतोऽत्र लिखामः। तत्र ब्रह्मयज्ञस्यायं प्रकारः — साङ्गानां वेदादिशास्त्राणां सम्यगध्ययनमध्यापनं सन्ध्योपासनं च सर्वैः कर्त्तव्यम्। तत्राध्ययनाध्यापनक्रमो यादृशः पठनपाठनविषय उक्तस्तादृशो ग्राह्यः। सन्ध्योपासनविधिश्च पञ्चमहायज्ञविधाने यादृश उक्तस्तादृशः कर्त्तव्यः। तथाग्निहोत्रविधिश्च यादृशस्तत्रोक्तस्तादृश एव कर्त्तव्यः। अत्र ब्रह्मयज्ञाग्निहोत्रप्रमाणं लिख्यते॥ [क]

Nous écrivons ici la méthode [à suivre] [dans l'execution] des cinq grands sacrifices, qui sont à faire obligatoirement (nityam) par les hommes. Alors, le brahmayajña [est] de cette manière – l'étude [et] l'enseignement des *Vedās*, avec ses annexes et les autres traités, et aux jonctions [du jour] [et] [de la nuit] (sandhyā) de la méditation (upāsanam) à faire par chacun.[10] La méthode didactique [à suivre] [est] comme [celle] prise [dans le chapitre] au sujet de l'étude et l'enseignement. Les injonctions pour les éloges, les prières et la méditation de Dieu (sandhyā) [sont] comme [celles] [de mon] [livre] [intitulé] *Pañca mahāyajña vidhiḥ*. De même, les injonctions pour l'agnihotra [sont] comme [celles] énoncées [dans ce] [livre] là [et] il est à faire comme cela. Ici, [quelques] propos authoritatifs [au sujet] du brahmayajña et [surtout] de l'agnihotra seront écrits.

ऋषिः - विरूप आङ्गिरसः। देवता - अग्निः। छन्दः - गायत्री। स्वरः - षड्जः॥

समिधाग्निं दुवस्यत घृतैर्बोधयतातिथिम्।

आस्मिन् हव्या जुहोतन॥

य० अ० ३। मं० १॥ [ख]

Éveillez (obligatoirement) le feu avec du bois [et] du beurre clarifié. Servez [le feu], l'invité (comme les hommes propriétaires donnent à l'invité de meilleures qualités un siège, de la nourriture, de l'eau et ainsi de suite). De tous côtés, lancez dans (le feu) (des substances) en offrande.

[10] यत्स्वाध्यायमधीयीतैकामप्यृचं यजुः साम वा तद्ब्रह्मयज्ञः संतिष्ठते॥

तैत्तिरीयारण्यके। २। १०॥

Parce qu'il doit étudier les *Vedās*, un vers [chacun] du *Ṛgveda*, du *Yajurveda*, du *Sāmaveda* et [de l'*Atharvaveda*], alors le brahmayajña [quotidien] est terminé.

भाष्यं गायत्र्यां तैत्तिरीयारण्यके प्रथमप्रपाठके, एकादशानुवाके वर्तते॥

Le commentaire sur le gāyatrī [mantra] dans le *Taittirīyāraṇyaka* est au premier prapāṭhaka, onzième anuvāka.

भाष्यम् — (समिधाग्निं०) हे मनुष्या ! वाय्वोषधिवृष्टिजलशुद्ध्या परोपकाराय, (घृतैः) घृतादिभिश्शोधितैर्द्रव्यैः समिधा चातिथिमग्निं यूयं बोधयत, नित्यं प्रदीपयत। (अस्मिन्) अग्नौ (हव्या) होतुमर्हाणि पुष्टिमधुरसुगन्धरोगनाशकरैर्गुणैर्युक्तानि सम्यक् शोधितानि द्रव्याणि (आ जुहोतन) आ समन्ताज्जुहुत। एवमग्निहोत्रं नित्यं (दुवस्यत) परिचरत। अनेन कर्मणा सर्वोपकारं कुरुत॥१॥ [ग]

Commentaire – Ô les hommes ! Avec du bois, avec des substances purifiantes, et du beurre clarifié éveillez obligatoirement le feu, [qui] [est] l’invité. Allumez-le afin de purifier l’air, les plantes [et] la pluie. De tous côtés, offrez dans le feu des substances [relativement] pures, dignes [d’être] [ingérées], [qui] [donnent] de la force, [sont] douces, de bonne odeur [et] [qui] détruisent les maladies. L’agnihotra [est] obligatoire. Servez [le feu]. Faites cette action pour le bienfait de tous.

ऋषिः - विश्वरूपः। देवता - अग्निः। छन्दः - गायत्री। स्वरः - षड्जः॥

अ॒ग्निं दू॒तं पु॒रो द॑धे हव्य॒वाह॒मुप॑ ब्रुवे।

दे॒वाँ२ऽआ सा॑दयादि॒ह॥

य० अ० २२। मं० १७॥ [घ]

Il doit asseoir les hommes de qualités divines ici de tous côtés. Je place devant [moi] le feu, le véhicule des offrandes, le messager (qui donne le bonheur divin). J’instruis [les autres].

(अग्निं दूतं) अग्निहोत्रकर्त्तैवमिच्छेदहं वायौ मेघमण्डले च भूतद्रव्यस्य प्रापणार्थमग्निं दूतं भृत्यवत् (पुरो दधे) सम्मुखतः स्थापये। कथम्भूतमग्निम् ? (हव्यवाहम्) हव्यं द्रव्यं देशान्तरं वहति प्रापयतीति हव्यवाट्, तं (उप ब्रुवे) अन्यान् जिज्ञासून्प्रत्युपदिशानि (देवाँ२०) सोऽग्निरेतदग्निहोत्रकर्मणा देवान् दिव्यगुणान् वायुवृष्टिजलशुद्धिद्वारेहास्मिन्संसार आसादयादासमन्तात्प्रापयति। यद्वा हे परमेश्वर ! (दूतं) सर्वेभ्यः सत्योपदेशकं (अग्निं) अग्निसंज्ञकं त्वां (पुरो दधे) इष्टत्वेनोपास्यं मन्ये। तथा (हव्यवाहं) ग्रहीतुं योग्यं शुभगुणमयं विज्ञानं हव्यं, तद् वहति प्रापयतीति तं त्वा (उप ब्रुवे) उपदिशानि। स भवान् कृपया (इह) अस्मिन् संसारे (देवाँ२०) दिव्यगुणान् (आ सादयात्) आ समन्तात् प्रापयतु॥ २॥ [ङ]

Celui qui fait l’agnihotra doit vouloir ainsi : « je garde devant [moi] le feu, le messager [qui] comme un serviteur véhicule les substances à l’air et aux nuages. » Comment le feu [agit-][il] sur les substances ? Il véhicule (vahati) les offrandes ; il [les] conduit vers un autre pays. Le feu de l’agnihotra [est] un moyen de purifier l’air, [les plantes] et la pluie. J’instruis les autres [qui] désirent connaître [l’action] [du feu]. Il doit asseoir les hommes de qualités divines ici de tous côtés. [Le sens] [est] cela ou… Ô Dieu tout puissant ! Par pitié, conduis-[nous] en ce monde (saṃsāre) aux qualités divines. [Tu] [es] pour tous le messager, le véritable instructeur (satyopadeśakam). Tu [es] nommé Agni. Je t’estime [être] l’adoré, le désiré (iṣṭatvena). [Tu] [es] le véhicule des offrandes. Tu connais le savoir utile [et] méritoire. J’instruis [ainsi] [les autres].

ऋषिः - भृगुः। देवता - अग्निः। छन्दः - त्रिष्टुप्॥

सा॒यंसा॑यं गृ॒हप॑तिर्नो अ॒ग्निः प्रा॒तः प्रा॑तः सौमन॒सस्य॑ दा॒ता।

वसो॑र्वसोर्वसु॒दानं॑ एधि व॒यं त्वेन्धा॑नास्त॒न्वं᳡ पुषेम॥

अथर्व० कां० १९। सू० ५५। ३॥ [च]

Chaque soir, le protecteur de notre maison [est] Agníḥ. [Chaque matin,] il [nous] donne bonheur. Nous désirons l’atteindre. Distributeur de propriétés, [donne-][nous] (les meilleurs objets). (En allumant) (le feu matériel) nous désirons prospérer matériellement.

[सायंसायं०] — (नः) अस्माकमयं (अग्निः) भौतिकः परमेश्वरश्च (गृहपतिः०) गृहात्मपालकः प्रातः सायं परिचरितः सूपासितश्च (सौमनसस्य दाता) आरोग्यस्यानन्दस्य च दातास्ति। तथा (वसोर्व०) उत्तमोत्तमपदार्थस्य च दातास्ति। अत एव परमेश्वरः 'वसुदानः' इति नाम्नाख्यायते। हे परमेश्वरैवं भूतस्त्वमस्माकं राज्यादिव्यवहारे हृदये च (एधि) प्राप्तो भव। तथा भौतिकोऽप्यग्निरत्र ग्राह्यः। (वयं त्वे०) हे परमेश्वर ! एवं त्वा त्वामिन्धानाः प्रकाशमाना वयं (तन्वं) शरीरं (पुषेम) पुष्टं कुर्य्याम। तथाग्निहोत्रादिकर्मणा भौतिकमग्निमिन्धानाः प्रदीपयितारः सन्तः सर्वे वयं पुष्यामः॥ ३॥ [छ]

Agniḥ, ce feu matériel ou Dieu, [est] le protecteur (pālakaḥ) de la maison [et] de [ses] habitants. Servi matin [et] soir, il [nous] donne santé et bonheur. Il [nous] donne la plus grande richesse. [C’][est] pourquoi Dieu est appelé le distributeur de propriétés (vasudānaḥ). Ô tout puissant (parameśvara) ! [Présides] à nos activités gouvernementales et autres activités (rājyādivyavahāre), sois accompli dans [nos] coeurs (hṛdaye). Nous te proclamons ! Ici, le feu matériel [est] aussi compris. Ainsi nous désirons prospérer matériellement en allumant le feu, en faisant l’agnihotra.

ऋषिः - भृगुः। देवता - अग्निः। छन्दः - त्रिष्टुप्॥

प्रा॒तः प्रा॑तर्गृ॒हप॑तिर्नो अ॒ग्निः सा॒यंसा॑यं सौमन॒सस्य॑ दा॒ता।

वसो॑र्वसोर्वसु॒दानं॑ ए॒धीन्धा॑नास्त्वा श॒तहि॑मा ऋधेम॥

अथर्व० कां० १९। सू० ५५। ४॥ [ज]

Chaque matin, le protecteur de notre maison [est] Agníḥ. Chaque soir, il [nous] donne bonheur. Distributeur de propriétés, [donne-][nous] un avoir après l’autre. En allumant [le feu] nous désirons prospérer cent hivers.

(प्रातः प्रातर्गृहपतिर्नो॰) अस्यार्थः पूर्ववद्विज्ञेयः। अत्र विशेषस्त्वयम् – एवमग्निहोत्रमीश्वरोपासनं च कुर्वन्तः सन्तः, (शतहिमाः) शतं हिमा हेमन्तर्तवो गच्छन्ति येषु संवत्सरेषु ते शतहिमा यावत्स्युस्तावत् (ऋधेम) वर्धेमहि। एवं कृतेन कर्मणा नोऽस्माकं कदाचिद्धानिर्न भवेदितीच्छामः॥ ४॥ [झ]

Le sens de ce [vers] est [celui] du précédent. Or, ici la différence [est] cela [que] [ceux] qui font l’agnihotra [et] méditent Dieu désirent prospérer [pendant] cent hivers, ils désirent vivre aussi longtemps que cent hivers. Ainsi en faisant [ce] sacrifice, nous désirons que n’advienne jamais de pertes.

अग्निहोत्रकरणार्थं ताम्रस्य मृत्तिकाया वैकां वेदिं सम्पाद्य, काष्ठस्य रजतसुवर्णयोर्वा चमसमाज्यस्थालीं च सङ्गृह्य, तत्र वेद्यां पलाशाम्रादिसमिधः संस्थाप्याग्निं प्रज्वाल्य, तत्र पूर्वोक्तद्रव्यस्य प्रातःसायङ्कालयोः प्रातरेव वोक्तमन्त्रैर्नित्यं होमं कुर्य्यात्। [ञ]

Ayant produit un autel (vedim) de cuivre [ou] de boue dans l’objectif de faire l’agnihotra, ayant pris une louche (camasam) et un récipient (sthālīm) pour le beurre clarifié [fait] de bois, d’argent ou d’or, là dans l’autel, du bois [de santal (*santalum album*),] de l’arbre à laque (*butea frondosa*), de manguier (*mangifera indica*) et ainsi de suite [est] placé dans le feu qui brûle. Il doit faire là [obligatoirement] ses offrandes matin [et] soir, ou le matin seulement, avec lesdites substances en récitant des vers.

[अथाग्निहोत्रे होमकरणमन्त्राः।] [ट]

Désormais les vers pour faire les oblations dans l'agnihotra [sont] [commentés] :

सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहा॥ १॥

सूर्यो वर्चो ज्योतिर्वर्चः स्वाहा॥ २॥

ज्योतिः सूर्यः सूर्यो ज्योतिः स्वाहा॥ ३॥

सजूर्देवेन सवित्रा सजूरुषसेन्द्रवत्या।

जुषाणः सूर्यो वेतु स्वाहा॥ ४॥

य॰ अ॰ ३। मं॰ ९-१०॥ [ठ]

(Il offre son oblation avec svāhā) à Dieu (tout puissant,) (le guide interne,) [qui] (donne) lumière (sur le Soi de chacun et sur le savoir avec les *Vedās*), au soleil [qui] (donne) lumière. (Il offre son oblation) à Dieu (le créateur) [qui] illumine, à la lumière (du soleil) [qui] illumine (toutes les activités). (Il offre son oblation) à Dieu (qui pénètre tout) [et] [qui] (donne) lumière, au soleil [qui] (donne) lumière. Le soleil brillant, avec (la création) de Savitá́, avec l’aube brillante, reçoit l’oblation.

इति प्रातःकालमन्त्राः ॥

Ainsi [sont] les vers le matin [à l'aube].

भाष्यम् — (सूर्यो०) यश्चराचरात्मा, ज्योतिषां प्रकाशकानां ज्योतिः प्रकाशकः, सूर्य्यः सर्वप्राणः परमेश्वरोऽस्ति, तस्मै स्वाहाऽर्थात् तदाज्ञापालनेन सर्वजगदुपकारायैकाहुतिं दद्मः ॥ १ ॥ [ड]

Commentaire – À Dieu [nommé] Sūrya, au Soi qui [pénètre] [ce] [qui] [est] mobile et immobile (carācarātmā), [à lui] [qui] donne lumière, [à lui] [qui] est le souffle vital (prānaḥ) de tous, le tout puissant (parameśvaraḥ), à lui *svāhā*, c'est-à-dire qu'en suivant ses commandements (ājñā) nous offrons une oblation pour le bienfait de tout [ce] [qui] se meut.

(सूर्यो व०) यो वर्च्चः सर्वविदां ज्योतिषां ज्ञानवतां जीवानां वर्च्चोऽन्तर्यामितया सत्योपदेष्टा सर्वात्मा सूर्य्यः परमेश्वरोऽस्ति, तस्मै० ॥ २ ॥ [ढ]

Dieu [est] la lumière des lumières. Il illumine les savants, les êtres vivants. [Il] [est] la restreinte interne [des hommes], [est] le véritable précepteur [et] [est] dans le Soi de chacun. Il est le tout puissant. À lui [nous] [offrons]...

(ज्योतिः सू०) यः स्वयम्प्रकाशः सर्वजगत्प्रकाशकः सूर्य्यो जगदीश्वरोऽस्ति, तस्मै० ॥ ३ ॥ [ण]

Sūryaḥ brille par lui-même. Il illumine la création en entier. Il est le créateur (jagadīśvaraḥ). À lui [nous] [offrons]...

(सजू०) यो देवेन द्योतकेन सवित्रा सूर्य्यलोकेन जीवेन च सह, तथा (इन्द्रवत्या) सूर्य्यप्रकाशवत्योषसाथवा जीववत्या मानसवृत्त्या (सजूः) सह वर्त्तमानः परमेश्वरोऽस्ति, सः (जुषाणः) सम्प्रीत्या वर्त्तमानः सन् (सूर्यः) सर्वात्मा कृपाकटाक्षेणास्मान् (वेतु) विद्यादिसद्गुणेषु जातविज्ञानान् करोतु, तस्मै० ॥ ४ ॥ [त]

[Sūryaḥ] [entre] dans le soleil brillant et le Soi (jīvena) [des êtres]. Il existe (vṛttyā) dans l'aube illuminée par le soleil ou dans l'instrument mental des êtres vivants. Lui le tout puissant (parameśvaraḥ), l'existant, est dans le Soi de chacun. Par amour [et] par pitié pour nous, [qu'][il] [nous] [donne] le savoir et de bonnes qualités, qu'il [nous] éveille. À lui [nous] [offrons]...

इमाश्चतस्त्र आहुतीः प्रातरग्निहोत्रे कुर्वन्ति।

Ces quatre oblations (āhutīḥ) sont faites le matin durant l'agnihotra.

अ॒ग्निर्ज्योति॒र्ज्योति॑र॒ग्निः स्वाहा॑ ॥ १ ॥

अग्निर्वर्चो ज्योतिर्वर्चः स्वाहा॥ २॥

अग्निर्ज्योतिरितिमन्त्रं मनसोच्चार्य्य तृतीयाहुतिर्देया॥ ३॥

सजूर्देवेन सवित्रा सजू रात्र्येन्द्रवत्या।

जुषाणोऽअग्निर्वेतु स्वाहा॥ ४॥

य० अ० ३। मं० ९-१०॥ [थ]

(Il offre son oblation avec svāhā) à Dieu (tout puissant) [qui] (donne) lumière (à tous), au feu [qui] (donne) lumière. (Il offre son oblation) à Dieu (le précepteur) [qui] illumine (l’acquisition du savoir), à la lumière qui illumine. (Il offre son oblation) à Dieu (le créateur) [qui] (donne) lumière (à tous), au feu [qui] (donne) lumière. Le feu servi, avec (la création produite par) Savitá, avec la nuit (obscure), avec la foudre, reçoit l’oblation.

[इति सायङ्कालमन्त्राः॥] [द]

Ainsi [sont] les vers le soir.

अथ सायङ्कालाहुतयः — (अग्निर्ज्योतिः०) यो ज्ञानस्वरूपो ज्योतिषां ज्योतिरग्निः परमेश्वरोऽस्ति, तस्मै०॥ १॥ [ध]

Désormais les [vers] [pour] les oblations du soir [sont] [commentés] – la nature d’Agniḥ, lumière des lumières, [est] le savoir [infini] (jñānasvarūpaḥ). Il est le tout puissant (parameśvaraḥ). À lui [nous] [offrons]…

(अग्निर्वर्चो०) यः पूर्वोक्तोऽग्निः परमेश्वरोऽस्ति, तस्मै०॥ २॥ [न]

Agniḥ est le susdit Dieu tout puissant. À lui [nous] [offrons]…

अग्निर्ज्योतिरित्यनेनैव तृतीयाहुतिर्देया। तदर्थश्च पूर्ववत्॥ ३॥ [प]

Dieu [donne] lumière (agnirjyotir), (le premier vers s’élève cette fois dans l’instrument mental). Avec cela, la troisième oblation est à offrir. Le sens [est] comme avant.

(सजूर्दे०) यः पूर्वोक्तेन देवेन सवित्रा सह परमेश्वरः सजूरस्ति यश्चेन्द्रवत्या वायुचन्द्रवत्या रात्र्या सह वर्त्तते सोऽग्निः (जुषाणः) सम्प्रीतोऽस्मान् (वेतु) नित्यानन्दमोक्षसुखाय स्वकृपया कामयतु, तस्मै जगदीश्वराय स्वाहेति पूर्ववत्॥ ४॥ [फ]

Dieu traverse le soleil brillant, la foudre, la nuit avec le vent [et] la lune. [Dieu,] [sois] satisfait de nous. Par pitié, fais-[nous] désirer le bonheur absolu (nityānanda) de la délivrance finale (mokṣa). À lui le créateur (jagadīśvarāya), *svāhā* [le sens] [est] comme avant.

एताभिः सायङ्कालेऽग्निहोत्रिणो जुह्वति। एकस्मिन्काले सर्वाभिर्वा॥ [ब]

Ceux qui pratiquent l'agnihotra sacrifient (juhvati) avec ces [vers] le soir. Ou [ils] [sacrifient] en un [seul] temps [au matin] avec tous [les vers].

अथोभयोः कालयोरग्निहोत्रे होमकरणार्थाः समानमन्त्राः। [भ]

